**2017**

**Part - I**

# SANSKRIT

**PAPER–IV**

**(Honours)**

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

**[First Half— 60 Marks]**

1. कालिदासोक्तदिशा मेघस्य गमनमार्ग सोदाहरणम् आलोचय। 14

अथवा

सोदाहरणमलकायाः शोभा समुपवर्ण्यताम्।

2. अधोलिखितयोः श्लोकयोःकस्यचिदेकस्य व्याख्या कार्या। 6

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥

अथवा

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तैः
नान्यस्तापं कुसुमशरजादिष्ट संयोगसाध्यात्।
नाप्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्तिः
वित्तेशानां न च खलु वयो यौवनादन्यदस्ति॥

3. वाणभट्टमनुसृत्य प्रभाकरवर्धनस्य अन्तिमावस्था उपस्थाप्यताम्। 14

अथवा

संस्कृतगद्यकाव्ये वाणभट्टस्य रचनाशैली विचारणीया।

4. अधोलिखितयोः कस्यचिदेकस्य व्याख्या कार्या। 6

(a) नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणंदुःखम्।
कृत्वालोकं तरला तड़िदिव वज्रं निपातयति॥

(b) अकाण्डे खल्वयं समुपस्थितो महाप्रलयो इव वज्रपातः।

5. नैषधचरितमनुसृत्य नलस्य चारित्रिकं वैशिष्टयम् आलोचनीयम्। 14

अथवा

नैषधचरितमहाकाव्यस्य नवमसर्गस्य कथासारः वर्णनीयः।

6. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या। 6

(a) गिरः श्रुता एव तव श्रवःसुधा श्लथामवन्नाम्नि तु न श्रुतिस्पृहा।
पिपासुता शान्तिमुपैति वारिणा न जातु दुग्धन्मधुनोऽधिकादपि॥





अथवा

अये! ममोदासितमेवं जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने।
गरौ गिरः पल्लवनार्थलाघवे मितञ्च सारञ्च वचो हि वाग्मिता॥

**[Second Half - 40 Marks]**

1. (a) मृच्छकटिके चित्रितं द्यूतकरवृत्तान्त आलोच्यताम्। 12

अथवा

(b) मृच्छकटिके उल्लिखिता वसन्तसेना कीदृशी नायिका? वसन्तसेनायाः चरित्रं वृत्तिः च प्रतिपाद्येताम्।

2. निम्नलिखितयोः कस्यचिदेकस्य व्याख्या संस्कृतभाषया कार्या। 8

(a) दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न संतिष्ठते
सुस्निवधा विमुखी भवन्ति सुहृदः स्फारी भवन्त्यापदः।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते।
पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते॥

(b) आलाने गृह्यते हस्ती वाजी बल्गासु गृह्यते।
हृदये गृह्यते नारी यदीदं नास्ति गम्यताम्॥

3. (a) मुद्राराक्षसनाटके मुद्रिकावृत्तान्तो विशदीक्रियताम्। 12

अथवा

(b) "कौटिल्यः कुटिलमतिः" इति पङ्क्तेः तात्पर्यं मुद्राराक्षसमनुसृत्य आलोच्यताम्।

4. निम्नलिखितयोः कस्यचिदेकस्य श्लोकस्य सप्रसङ्गव्याख्या कार्या संस्कृतगिरा। 8